द्वितीयोऽध्यायः

प्रथमः पादः

१ समर्थः पदविधिः ।
२ सुबामन्त्रिते पराङ्गवत् स्वरे ।
३ प्राक् कडारात् समासः ।
४ सह सुपा ।
५ अव्ययीभावः ।
६ अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु ।
७ यथासादृश्ये ।
८ यावदवधारणे ।
९ सुप् प्रतिना मात्रार्थे ।
१० अक्षशलाकासंख्याः परिणा ।
११ विभाषाऽपपरिबहिरञ्चवः पञ्चम्या ।
१२ आङ् मर्यादाभिविध्योः ।
१३ लक्षणेनाभिप्रती आभिमुख्ये ।
१४ अनुर्यत्समया ।
१५ यस्य चायामः ।
१६ तिष्ठद्गुप्रभृतीनि च ।
१७ पारे मध्ये षष्ठ्या वा ।
१८ संख्या वंश्येन ।
१९ नदीभिश्च ।
२० अन्यपदार्थे च संज्ञायाम् ।
२१ तत्पुरुषः ।
२२ द्विगुश्च ।
२३ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः।
२४ स्वयं क्तेन ।
२५ खट्वा क्षेपे ।
२६ सामि ।
२७ कालाः ।

२८ अत्यन्तसंयोगे च ।
२९ तृतीया तत्कृतार्थेन गुणवचनेन ।
३० पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ।
३१ कर्तृकरणे कृता बहुलम् ।
३२ कृत्यैरधिकार्थवचने ।
३३ अन्नेन व्यञ्जनम् ।
३४ भक्ष्येण मिश्रीकरणम् ।
३५ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ।
३६ पञ्चमी भयेन ।
३७ अपेतापोढमुक्तपतितापत्रस्तैरल्पशः ।
३८ स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ।
३९ सप्तमी शौण्डैः ।
४० सिद्धशुष्कपक्वबन्धैश्च ।
४१ ध्वाङ्क्षेण क्षेपे ।
४२ कृत्यैर्ऋणे ।
४३ संज्ञायाम् ।
४४ क्तेनाहोरात्रावयवाः ।
४५ तत्र ।
४६ क्षेपे ।
४७ पात्रेसमितादयश्च ।
४८ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ।
४९ दिक्संख्ये संज्ञायाम् ।
५० तद्धितार्थोत्तरपदसमाहारे च ।
५१ संख्यापूर्वो द्विगुः ।
५२ कुत्सितानि कुत्सनैः ।
५३ पापाणके कुत्सितैः ।
५४ उपमानानि सामान्यवचनैः ।
५५ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ।
५६ विशेषणं विशेष्येण बहुलम् ।
५७ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ।
५८ श्रेण्यादयः कृतादिभिः ।
५९ क्तेन नञ्विशिष्टेनानञ् ।

६० सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ।
६१ वृन्दारकनागकुञ्जरैः पूज्यमानम् ।
६२ कतरकतमौ जातिपरिप्रश्ने ।
६३ किं क्षेपे ।
६४ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ।
६५ प्रशंसावचनैश्च ।
६६ युवा खलतिपलितवलिनजरतीभिः ।
६७ कृत्यतुल्याख्या अजात्या ।
६८ वर्णो वर्णेन ।
६९ कुमारः श्रमणादिभिः ।
७० चतुष्पादो गर्भिण्या ।
७१ मयूरव्यंसकादयश्च ।

द्वितीयः पादः

१ पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ।
२ अर्धं नपुंसकम् ।
३ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् ।
४ प्राप्तापन्ने च द्वितीयया ।
५ कालाः परिमाणिना ।
६ नञ् ।
७ ईषदकृता ।
८ षष्ठी ।
९ याजकादिभिश्च ।
१० न निर्धारणे ।
११ पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन ।
१२ क्तेन च पूजायाम् ।
१३ अधिकरणवाचिना च ।
१४ कर्मणि च ।
१५ तृजकाभ्यां कर्तरि ।
१६ कर्तरि च ।
१७ नित्यं क्रीडाजीविकयोः ।

१८ कुगतिप्रादयः ।
१९ उपपदमतिङ् ।
२० अमैवाव्ययेन ।
२१ तृतीयाप्रभृतीन्यन्यतरस्याम् ।
२२ क्त्वा च ।
२३ शेषो बहुव्रीहिः ।
२४ अनेकमन्यपदार्थे ।
२५ संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये ।
२६ दिङ्नामान्यन्तराले ।
२७ तत्र तेनेदमिति सरूपे ।
२८ तेन सहेति तुल्ययोगे ।
२९ चार्थे द्वन्द्वः ।
३० उपसर्जनं पूर्वम् ।
३१ राजदन्तादिषु परम् ।
३२ द्वन्द्वे घि ।
३३ अजाद्यदन्तम् ।
३४ अल्पाच्तरम् ।
३५ सप्तमीविशेषणे बहुव्रीहौ ।
३६ निष्ठा ।
३७ वाहिताग्न्यादिषु ।
३८ कडाराः कर्मधारये ।

तृतीयः पादः

१ अनभिहिते ।
२ कर्मणि द्वितीया ।
३ तृतीया च होश्छन्दसि ।
४ अन्तरान्तरेण युक्ते ।
५ कालाध्वनोरत्यन्तसंयोगे ।
६ अपवर्गे तृतीया ।
७ सप्तमीपञ्चम्यौ कारकमध्ये ।
८ कर्मप्रवचनीययुक्ते द्वितीया ।

९ यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ।
१० पञ्चम्यपाङ्परिभिः ।
११ प्रतिनिधिप्रतिदाने च यस्मात् ।
१२ गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ।
१३ चतुर्थी संप्रदाने ।
१४ क्रियार्थोपपदस्य च कर्मणि स्थानिनः ।
१५ तुमर्थाच्च भाववचनात् ।
१६ नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च ।
१७ मन्यकर्मण्यनादरे विभाषाऽप्राणिषु ।
१८ कर्तृकरणयोस्तृतीया ।
१९ सहयुक्तेऽप्रधाने ।
२० येनाङ्गविकारः ।
२१ इत्थंभूतलक्षणे ।
२२ संज्ञोऽन्यतरस्यां कर्मणि ।
२३ हेतौ ।
२४ अकर्तर्यृणे पञ्चमी ।
२५ विभाषा गुणेऽस्त्रियाम् ।
२६ षष्ठी हेतुप्रयोगे ।
२७ सर्वनाम्नस्तृतीया च ।
२८ अपादाने पञ्चमी ।
२९ अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते ।
३० षष्ठ्यतसर्थप्रत्ययेन ।
३१ एनपा द्वितीया ।
३२ पृथग्विनानानाभिस्तृतीयान्यतरस्याम् ।
३३ करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य ।
३४ दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ।
३५ दूरान्तिकार्थेभ्यो द्वितीया च ।
३६ सप्तम्यधिकरणे च ।
३७ यस्य च भावेन भावलक्षणम् ।
३८ षष्ठी चानादरे ।
३९ स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ।
४० आयुक्तकुशलाभ्यां चासेवायाम् ।

४१ यतश्च निर्धारणम् ।
४२ पञ्चमी विभक्ते ।
४३ साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ।
४४ प्रसितोत्सुकाभ्यां तृतीया च ।
४५ नक्षत्रे च लुपि ।
४६ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ।
४७ संबोधने च ।
४८ सामन्त्रितम् ।
४९ एकवचनं संबुद्धिः ।
५० षष्ठी शेषे ।
५१ ज्ञोऽविदर्थस्य करणे ।
५२ अधीगर्थदयेशां कर्मणि ।
५३ कृञः प्रतियत्ने ।
५४ रुजार्थानां भाववचनानामज्वरेः ।
५५ आशिषि नाथः ।
५६ जासिनिप्रहणनाटक्राथपिषां हिंसायाम् ।
५७ व्यवहृपणोः समर्थयोः ।
५८ दिवस्तदर्थस्य ।
५९ विभाषोपसर्गे ।
६० द्वितीया ब्राह्मणे ।
६१ प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने ।
६२ चतुर्थ्यर्थे बहुलं छन्दसि ।
६३ यजेश्च करणे ।
६४ कृत्वोऽर्थप्रयोगे कालेऽधिकरणे ।
६५ कर्तृकर्मणोः कृति ।
६६ उभयप्राप्तौ कर्मणि ।
६७ क्तस्य च वर्तमाने ।
६८ अधिकरणवाचिनश्च ।
६९ न लोकाव्ययनिष्ठाखलर्थतृनाम् ।
७० अकेनोर्भविष्यदाधमर्ण्ययोः ।
७१ कृत्यानां कर्तरि वा ।
७२ तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् ।

७३ चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ।

चतुर्थः पादः

१ द्विगुरेकवचनम् ।
२ द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् ।
३ अनुवादे चरणानाम् ।
४ अध्वर्युक्रतुरनपुंसकम् ।
५ अध्ययनतोऽविप्रकृष्टाख्यानाम् ।
६ जातिरप्राणिनाम् ।
७ विशिष्टलिङ्गो नदी देशोऽग्रामाः ।
८ क्षुद्रजन्तवः ।
९ येषां च विरोधः शाश्वतिकः ।
१० शूद्राणामनिरवसितानाम् ।
११ गवाश्वप्रभृतीनि च ।
१२ विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् ।
१३ विप्रतिषिद्धं चानधिकरणवाचि ।
१४ न दधिपयआदीनि ।
१५ अधिकरणैतावत्त्वे च ।
१६ विभाषा समीपे ।
१७ स नपुंसकम् ।
१८ अव्ययीभावश्च ।
१९ तत्पुरुषोऽनञ्कर्मधारयः ।
२० संज्ञायां कन्थोशीनरेषु ।
२१ उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ।
२२ छाया बाहुल्ये ।
२३ सभा राजामनुष्यपूर्वा ।
२४ अशाला च ।
२५ विभाषा सेनासुराच्छायाशालानिशानाम् ।
२६ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ।
२७ पूर्ववदश्ववडवौ ।
२८ हेमन्तशिशिरावहोरात्रे चच्छन्दसि ।

२९ रात्राह्नाहाः पुंसि ।
३० अपथं नपुंसकम् ।
३१ अर्धर्चाः पुंसि च ।
३२ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ।
३३ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ।
३४ द्वितीयाटौस्स्वेनः ।
३५ आर्धधातुके ।
३६ अदो जग्धिर्ल्यप्ति किति ।
३७ लुङ्सनोर्घस्लृ ।
३८ घञपोश्च ।
३९ बहुलं छन्दसि ।
४० लिट्यन्यतरस्याम् ।
४१ वेञो वयिः ।
४२ हनो वध लिङि ।
४३ लुङि च ।
४४ आत्मनेपदेष्वन्यतरस्याम् ।
४५ इणो गा लुङि ।
४६ णौ गमिरबोधने ।
४७ सनि च ।
४८ इङश्च ।
४९ गाङ् लिटि ।
५० विभाषा लुङ्लृङोः ।
५१ णौ च संश्चङोः ।
५२ अस्तेर्भूः ।
५३ ब्रुवो वचिः ।
५४ चक्षिङः ख्याञ् ।
५५ वा लिटि ।
५६ अजेर्व्यघञपोः ।
५७ वा यौ ।
५८ ण्यक्षत्रियार्षञितो यूनि लुगणिञोः ।
५९ पैलादिभ्यश्च ।
६० इञः प्राचाम् ।

६१ न तौल्वलिभ्यः ।
६२ तद्राजस्य बहुषु तेनैवास्त्रियाम् ।
६३ यस्कादिभ्यो गोत्रे ।
६४ यञञोश्च ।
६५ अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ।
६६ बह्वच इञः प्राच्यभरतेषु ।
६७ न गोपवनादिभ्यः ।
६८ तिककितवादिभ्यो द्वन्द्वे ।
६९ उपकादिभ्योऽन्यतरस्यामद्वन्द्वे ।
७० आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ।
७१ सुपो धातुप्रातिपदिकयोः ।
७२ अदिप्रभृतिभ्यः शपः ।
७३ बहुलं छन्दसि ।
७४ यङोऽचि च ।
७५ जुहोत्यादिभ्यः श्लुः ।
७६ बहुलं छन्दसि ।
७७ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ।
७८ विभाषा घ्राधेट्शाच्छासः ।
७९ तनादिभ्यस्तथासोः ।
८० मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः ।
८१ आमः ।
८२ अव्ययादाप्सुपः ।
८३ नाव्ययीभावादतोऽम्त्वपञ्चम्याः ।
८४ तृतीयासप्तम्योर्बहुलम् ।
८५ लुटः प्रथमस्य डारौरसः ।